# Shri Sharabha Nigrahadaruna Saptakam

# શ્રીશરભ નિગ્રહદારુણ સપ્તકમ્

## Document Information

Text title : Sharabha Nigrahadaruna Saptakam by Shri Nrisimha from Akashabhairavakalpa

File name : sharabhanigrahadAruNasaptakam.itx

Category : shiva, saptaka

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Description/comments : Akashabhairavakalpa

Latest update : February 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 21, 2022

*sanskritdocuments.org*

Shri Sharabha Nigrahadaruna Saptakam

# શ્રીશરભ નિગ્રહદારુણ સપ્તકમ્

ૐ શ્રીગણેશાય નમઃ ।

વિનિયોગઃ -

અસ્ય શ્રી નિગ્રહદારુણસપ્તકમાલામન્ત્રસ્ય શ્રીસદાશિવઋષિઃ

બૃહતી છન્દઃ શ્રીશરભો દેવતા મમ વૈરિવિનાશાર્થે ભગવન્

શ્રીશરભ સાલુવ પક્ષિરાજ દેવતા પ્રસન્નાર્થે જપે વિનિયોગઃ ।

ધ્યાનમ્ -

ચન્દ્રાર્કાગ્નિસ્ત્રિદૃષ્ટિઃ કુલિશવરનખશ્ચઞ્ચલોઽત્યુગ્રજિહ્વઃ

  કાલી દુર્ગા ચ પક્ષૌ હૃદયજઠરગો ભૈરવો વાડવાગ્નિઃ ।

ઊરૂસ્થૌ વ્યાધિમૃત્યૂ શરભવરખગશ્ચણ્ડવાતાતિવેગઃ

  સંહર્તા સર્વશત્રૂન્ સ જયતિ શરભઃ શાલુવઃ પક્ષિરાજઃ ॥

કોપોદ્રેકાતિનિર્યન્નિખિલપરિચરત્તામ્રભારપ્રભૂતં

  જ્વાલામાલાગ્રદગ્ધસ્મરતનુસકલં ત્વામહં શાલુવેશ ।

યાચે ત્વત્પાદપદ્મપ્રણિહિતમનસં દ્વેષ્ટિ માં યઃ ક્રિયાભિઃ

  તસ્ય પ્રાણપ્રયાણં પરશિવ ભવતઃ શૂલભિન્નસ્ય તૂર્ણમ્ ॥ ૧॥

શમ્ભો ત્વદ્ધસ્તકુન્તક્ષતરિપુહૃદયાન્નિઃસ્રવલ્લોહિતૌઘં

  પીત્વા પીત્વાઽતિદિર્ઘા દિશિ દિશિ વિચરાસ્ત્વદગણાશ્ચણ્ડમુખ્યાઃ ।

ગર્જન્તુ ક્ષિપ્રવેગા નિખિલજયકરા ભીકરાઃ ખેલલોલાઃ

  સન્ત્રસ્તાબ્રહ્મદેવાઃ શરભ ખગપતે ત્રાહિ નઃ શાલુવેશ ॥ ૨॥

સર્વાદ્યં સર્વનિષ્ઠં સકલભયકરં ત્વત્સ્વરૂપં હિરણ્યં

  યાચેઽહં ત્વામમોઘં પરિકરસહિતં દ્વેષ્ટિ માં યઃ ક્રિયાભિઃ ।

શ્રીશમ્ભો ત્વત્કરાબ્જસ્થિતકુલિશકરાઘાતવક્ષઃસ્થલસ્ય

  પ્રાણાઃ પ્રેતેશદૂતગ્રહગણપરિખાઃ ક્રોશપૂર્વં પ્રયાન્તુ ॥ ૩॥

દ્વિષ્મઃ ક્ષોણ્યાં વયં હિ તવ પદકમલધ્યાનનિર્ધૂતપાપાઃ

  કૃત્યાકૃત્યૈર્વિમુક્તા વિહગકુલપતે ખેલયા બદ્ધમૂર્તે ।

તૂર્ણં ત્વત્પાદપદ્મપ્રધૃતપરશુના તુણ્ડખણ્ડીકૃતાઙ્ગઃ
    સદ્દ્વેષી યાતુ યામ્યં પુરમતિકલુષં કાલપાશાગ્રબદ્ધઃ ॥ ૪॥

ભીમ શ્રીશાલુવેશ પ્રણતભયહર પ્રાણજિદ્દુર્મદાનાં
    યાચેઽહં ચાસ્ય વર્ગપ્રશમનમિહ તે સ્વેચ્છયા બદ્ધમૂર્તે ।
ત્વામેવાશુ ત્વદઙ્ઘ્ર્યષ્ટકનખવિલસદ્ગ્રીવજિહ્વોદરસ્ય
    પ્રાણા યાન્તુ પ્રયાણં પ્રકટિતહૃદયસ્યાયુરલ્પાયતેશ ॥ ૫॥

શ્રીશૂલં તે કરાગ્રસ્થિતમુસલગદાવૃત્તવાત્યાભિઘાતાત્
    યાતાયાતારિયૂથં ત્રિદશવિઘટનોદ્ધૂતરક્તચ્છટાર્દ્રમ્ ।
સદ્દૃષ્ટ્વાઽઽયોધને જ્યામખિલસુરગણાશ્ચાશુ નન્દન્તુ નાના
    ભૂતા વેતાલપૂગઃ પિબતુ તદખિલં પ્રીતચિત્તઃ પ્રમત્તઃ ॥ ૬॥

અલ્પં દોર્દણ્ડબાહુપ્રકટિતવિનમચ્ચણ્ડકોદણ્ડમુક્તૈ-
    ર્બાણૈર્દિવ્યૈરનેકૈઃ શિથિલિતવપુષઃ ક્ષીણકોલાહલસ્ય ।
તસ્ય પ્રાણાવસાનં પર શરભ વિભોઽહં ત્વદિજ્યાપ્રભાવૈઃ
    તૂર્ણં પશ્યામિ યો માં પરિહસતિ સદા ત્વાદિમધ્યાન્તહેતો ॥ ૭॥

ઇતિ નિશિ પ્રયતસ્તુ નિરાસનો યમમુખઃ શિવભાવમનુસ્મરન્ ।
પ્રતિદિનં દશવારદિનત્રયં જપતિ નિગ્રહદારુણસપ્તકમ્ ॥ ૮॥

ઇતિ ગુહ્યં મહાબીજં પરમં રિપુનાશનમ્ ।
ભાનુવારં સમારભ્ય મઙ્ગલાન્તં જપેત્સુધીઃ ॥ ૯॥

ઇતિ શ્રી આકાશભૈરવકલ્પે પ્રત્યક્ષસિદ્ધિપ્રદે
    નરસિંહકૃતા શરભસ્તુતિઃ સમાપ્તા ॥

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Psa Easwaran psaeaswaran

*Shri Sharabha Nigrahadaruna Saptakam*
pdf was typeset on July 21, 2022

Please send corrections to *sanskrit@cheerful.com*